# अखिलभारतीया वेदसङ्गोष्ठी

(दिनाङ्काः 26, 27, 28 फरवरी, 2025)

**ज्ञानप्रवाहः (सांस्कृतिकाध्ययन-शोधकेन्द्रम्)**

सामनेघाट - दक्षिणम्

वाराणसी-221005

*आयोजकसंस्था:*

महर्षिसान्दीपनिराष्ट्रीयवेदविद्याप्रतिष्ठानम्

श्रीपट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रम्

ज्ञानप्रवाहः

*संरक्षका:*

प्रो. हृदयरञ्जनशर्मा

प्रो. विरूपाक्ष वि. जड्डीपालः

श्रीमती विमला पोद्दारः

*संयोजक:*

प्रो. युगलकिशोरमिश्रः

*परामर्शदातृमण्डलम्*

प्रो. अञ्जनचक्रवर्ती

प्रो. गोपालप्रसादशर्मा

**सहसंयोजक:**

प्रो. आनन्दकुमारश्रीवास्तवः

**निदेशक:**

प्रो. श्रीकिशोरमिश्रः

**कार्यालय:**


ज्ञानप्रवाहः, सामनेघाट - दक्षिणम्

वाराणसी - 221005

दूरभाषः - (0542) 2366326, 2310325, 2276931

दूरच्छाया (Fax) - 0542-2366971

e-mail – jnanapravaha.vns@ gmail.com


सम्मान्याः,

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानद्वारा ज्ञानप्रवाहस्य श्रीपट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रस्य च संयुक्ततत्त्वावधाने फाल्गुने त्रयोदशीचतुर्दश्यमातिथिषु (2081 वि.) शुक्र-शनि-रविवासरेषु (26, 27, 28 फरवरी, 2025 ई. दिनाङ्केषु) *'वेदोपाङ्गं नव्यन्यायशास्त्रम्'* इतिविषयमाश्रित्य अखिलभारतीया वेदसङ्गोष्ठी वाराणस्यां ज्ञानप्रवाहपरिसरे समायोजयिष्यमाणा वर्तते। अस्यां सङ्गोष्ठ्यां भागग्रहणाय श्रीमन्तः प्रार्थ्यन्ते सबहुमानमामन्त्र्यन्ते च।विदितमेव तत्रभवतां यद् बहुभिराचार्यैर्वेदानां समुपबृंहणं विभिन्नाभिर्दृष्टिभिर्व्यधायि। तत्र नव्यन्यायदर्शनतत्त्वानां वेदोपदेशः पदार्थविज्ञानदिशा विविधव्याख्यानेषु निहितं गभीरचिन्तनं शास्त्रीयस्वारस्यविश्लेषणञ्चास्याः सङ्गोष्ठ्याः समुद्देश्यं विद्यते। अतो विषयमभिलक्ष्य विशेषतो वैदिकदृशा नव्यन्यायशास्त्रग्रन्थ-महत्त्वाचार्यसिद्धान्तभेदादिविमर्शपराः शोधनिबन्धा अत्रापेक्ष्यन्ते। तत्र कतिपये अवान्तरविषया वक्ष्यमाणतया भवतां सौविध्याय प्रस्तूयन्ते –

1. नव्यन्यायशास्त्रस्योपकारिता
2. नव्यन्यायशास्त्रोपाङ्गत्वधारणे श्रौतदृष्टिः
3. नव्यन्यायदर्शनस्य वेदोपाङ्गत्वे परम्पराविमर्शः
4. वेदे नव्यन्यायशास्त्रस्रोतांसि
5. उपाङ्गेषु नव्यन्यायशास्त्रवैशिष्ट्यम्
6. वैदिकवाङ्मये पदार्थज्ञानप्रतिपादकनव्यन्यायशास्त्रोपयोगिता
7. वैदिकी पदार्थविज्ञानशास्त्रपरम्परा
8. नव्यन्यायशास्त्रदिशा ऋग्वेदीया विशिष्टसिद्धान्ताः
9. नव्यन्यायशास्त्रदिशा यजुर्वेदीया विशिष्टसिद्धान्ताः
10. नव्यन्यायशास्त्रदिशा सामवेदीया विशिष्टसिद्धान्ताः
11. नव्यन्यायशास्त्रदिशाथर्ववेदीया विशिष्टसिद्धान्ताः
12. पदार्थविज्ञानशास्त्रे वैदिकी भूमिका
13. नव्यन्यायदर्शनस्य पुराणेषूपबृंहणम्
14. भौतिकपदार्थशास्त्रस्य वैदिकमूलानि
15. पदार्थशास्त्रस्यागमेषूपबृंहणम्
16. नव्यन्यायाभिमतपदार्थशास्त्रस्य संस्कृतवाग्वैभवे अवदानम्
17. आर्षपरम्परायां नव्यन्यायशास्त्रस्य महत्त्वम्
18. भौतिकतत्त्वविज्ञानस्य शास्त्रान्तरेषूपयोगः
19. नव्यन्यायशास्त्रीयग्रन्थानां हस्तलेख-मुद्रण-सम्पादन-पाठालोचनादिविमर्शः
20. नव्यन्यायस्य कर्मविज्ञानसम्प्रदाये प्रभावः
21. संस्कृतवाङ्मये पदार्थवर्णना

उपर्युक्तदिशा कमपि विषयमवलम्ब्य संस्कृतहिन्द्याङ्ग्लान्यतमभाषामयं शोधनिबन्धं वेदसङ्गोष्ठ्यां प्रस्तोतुं भवन्तो निवेद्यन्ते। कृपया स्वीयनिबन्धस्य सुवाच्या प्रतिलिपिः जनवरीमासस्य द्वितीयसप्ताहं यावत् संयोजकाय प्रेषणीया, येन तन्मुद्रणादिव्यवस्थायां सौकर्यं स्यात्। सङ्गोष्ठ्यां भागग्रहणाय स्वीकृतिः शोधनिबन्धशीर्षकञ्च प्रहीयमाणेन पत्रेण सत्वरं सूच्यताम्। विश्वविद्यालयीयनियमानुसारं वातानुकूलमार्गव्ययो भवद्भ्यः सादरमर्पयिष्यते। एतदपि सूच्यते यत् 26.2.2025 दिने महाशिवरात्रिपर्व भवति।भवतां तस्मिन् दिने वाराणस्यामुपस्थितिर्भगवतो विश्वेश्वरस्य दर्शनञ्च सम्पद्येत इति बुद्ध्या गोष्ठीतिथयः सङ्कल्पिताः। अत एव ज्ञानप्रवाहपरिसरस्थिते अतिथिभवने श्रीमारवाडीसेवासंघस्य असीचतुष्पथस्थिते भवने च भवतामावासादिव्यवस्था 25 फरवरी-दिनाङ्कस्य सायङ्कालप्रभृति 28 फरवरी-दिनाङ्कस्य सायङ्कालं यावद् विधास्यते।

भवतां सहयोगः स्वीकृतिपत्रोत्तरञ्च यथाशीघ्रमाशास्यत इति निवेदयति,

युगमिश्रः

(युगलकिशोरमिश्रः)

संयोजकः

श्रीमन्तः ........................................

........................................

# स्वीकृतिपत्रम्

(इदं प्रपत्रं पूरयित्वा संयोजकार्थं प्रत्यावर्तनीयम्)

महानुभावा:,

वाराणस्यां ज्ञानप्रवाहे 26, 27, 28 फरवरी, 2025 दिवसेषु सम्पत्स्यमानाया अखिलभारतीयवेदसङ्गोष्ठ्या निमन्त्रणपत्रमवाप्य स्वीक्रियते यदहं संगोष्ठ्यां समुपस्थाय ........................................................................................

........................................................................................

शीर्षकेण शोधनिबन्धं..........................................................सत्रे प्रस्तोष्यामि।

अहं...........................दिनाङ्के...........................वादने...........................

यानद्वारा वाराणसीमागमिष्यामि। ममावासप्रबन्धो ज्ञानप्रवाहद्वारा अपेक्षित: अस्ति/नास्ति इति निवेदयते -

भवदीय:

(हस्ताक्षराणि)

नाम.........................................................

पदम्, संस्था च..............................................

पत्रव्यवहारार्थमावाससङ्केत: ........................................

........................................

दूरभाषसंख्या...............................................

चलदूरभाषसंख्या...........................................

ईमेल- सङ्केत: ........................................

**अवधेयम्** – आवासव्यवस्थार्थं शिवरात्रिपर्वण: पञ्चदशदिवसेभ्य: प्राक् स्वीकृतिपत्रस्य प्राप्ति: संयोजकसविधे भवेदिति कृपया निश्चेतव्यम्। अन्यथा आवाससम्भावना विलुप्येत।